# Ardranandalakshmivratanirupanam

# આર્દ્રાનન્દલક્ષ્મીવ્રતનિરૂપણમ્

## Document Information

Text title : Ardranandalakshmivratanirupanam

File name : ArdrAnandalakShmIvratanirUpaNam.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, lakShmI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 138/22-53||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# આર્દ્રાનન્દલક્ષ્મીવ્રતનિરૂપણમ્

શ઼ૃણુ લક્ષ્મિ વ્રતં ચાન્યત્તવૈવ દશમીદિને ।
આષાઢે શુક્લપક્ષે વૈ ચાતુર્માસ્યાઽગ્રગે દિને ॥ ૨૨॥

પ્રાતરેવ સમુત્થાય સ્નાત્વા ધ્યાયેદ્ધરિં પ્રભુમ્ ।
તતશ્ચાર્દ્રાનન્દલક્ષ્મીં સૌવર્ણીં પૂજયેદ્વ્રતી ॥ ૨૩॥

અઙ્ગુષ્ઠમાત્રાં સદ્વસ્ત્રાં ભૂષાશ઼ૃઙ્ગારશોભિતામ્ ।
નારાયણીશ્રિયં દર્ભગન્ધોદકૈઃ સુચન્દનૈઃ ॥ ૨૪॥

સ્નાપયેચ્છુક્લપુષ્પૈશ્ચ કુઙ્કુમાક્ષતભોજનૈઃ ।
નૈવેદ્યૈર્ભોજયેચ્ચાપિ નીરાજયેત્ ક્ષમાપયેત્ ॥ ૨૫॥

અનાદિશ્રીકૃષ્ણનારાયણેન સહિતાં શ્રિયમ્ ।
પ્રાર્થયેદ્ભાવહૃદયૈઃ સ્વેષ્ટદં સ્વેષ્ટદાં તદા ॥ ૨૬॥

મહાલક્ષ્મ્યૈ નમઃ પાદૌ મહાવિષ્ણો નમોઽસ્તુ તે ।
શોકહન્ત્ર્યૈ નમો જઙ્ઘે સુખદાય નમોઽસ્તુ તે ॥ ૨૭॥

કમલાયૈ નમશ્ચોરૂ આનન્દાય નમો હરે ।
ઈશ્વરિણ્યૈ નમઃ કટિં સમ્પત્પ્રદાય તે નમઃ ॥ ૨૮॥

માધવ્યૈ ચ નમો નાભૌ સ્વર્ણવર્ણાય તે નમઃ ।
સ્તનૌ પોષણકારિણ્યૈ નમો વિશ્વમ્ભરાય તે ॥ ૨૯॥

કણ્ઠે નમઃ સરસ્વત્યૈ નીલકણ્ઠાય તે નમઃ ।
કરૌ કમલધારિણ્યૈ નારાયણાય તે નમઃ ॥ ૩૦॥

બાહૂ નમો રક્ષયિત્ર્યૈ સુદર્શનધરાય ચ ।
ચાન્દ્યૈ ચન્દ્રાનને નૌમિ હરિં વહ્નિમુખાય ચ ॥ ૩૧॥

નેત્રે કૃપાપ્રવર્ષિણ્યૈ કરુણાનિલયાય ચ ।
ભ્રુવૌ નમઃ ક્ષેમદાયૈ કુશલકારિણે નમઃ ॥ ૩૨॥

લલાટે ધનરૂપાયૈ સ્વર્ણવર્ણાય તે નમઃ ।
મુકુટે સર્વરત્નાયૈ સકૌસ્તુભાય તે નમઃ ॥ ૩૩॥

સર્વકાયૌ સર્વવાસૌ સર્વૈશ્વર્યસમન્વિતૌ ।
સર્વકામપ્રદૌ વન્દે આર્દ્રાશ્ચાનન્દમાધવૌ ॥ ૩૪॥

સમ્પદા ચોપકરણૈર્ધનૈર્ધાન્યૈ રસાદિભિઃ ।
ભૂષામ્બરાદિભિશ્ચાપિ ગૃહમાર્દ્રં પ્રપૂરિતમ્ ॥ ૩૫॥

કુરુતં સ્ત્રીદાસદાસીભૃત્યાપત્યસુશોભિતમ્ ।
દિવ્યસાધનશોભં ચ ધેનુવાજિગજાન્વિતમ્ ॥ ૩૬॥

ઉદ્યાનવાટીક્ષેત્રાઢ્યં યશોમાનપ્રવર્ધિતમ્ ।
યાનવિમાનવાહાઢ્યં શિષ્યપ્રશિષ્યસત્પ્રજમ્ ॥ ૩૭॥

મોદપ્રમોદસૌખ્યાઢ્યં સમુત્સાહોત્સવાન્વિતમ્ ।
વાદ્યગીતિમહાસત્રદાનપાનસમન્વિતમ્ ॥ ૩૮॥

ધર્મકર્માઽધ્વરયુક્તં નિત્યં ચ બહુદક્ષિણમ્ ।
વિઘ્નશૂન્યં પઞ્ચયજ્ઞપરં કુરુતં મદ્ગૃહમ્ ॥ ૩૯॥

સ્નુષાભિઃ પરિતો રમ્યાં સાધુસાધ્વીવિરાજિતમ્ ।
પરમેશમહાભક્તિપ્રવાહિતં નિરન્તરમ્ ॥ ૪૦॥

અન્તે દિવ્યરસાઢ્યે વામક્ષરે વસતિં ચ મે ।
એવમભ્યર્થ્ય ચ પુષ્પાઞ્જલિં દત્વા વિસર્જયેત્ ॥ ૪૧॥

લક્ષ્મીં નારાયણં ચાર્દ્રાનન્દૌ શ્રીગુરવે દિશેત્ ।
રત્નહીરકધાન્યાનિ દ્વિજાતિભ્યો દિશેત્તથા ॥ ૪૨॥

ભોજયેદ્બાલબાલાદ્યા દિશેચ્ચ દક્ષિણાઃ શુભાઃ ।
શઙ્ખચક્રે સકટકે સ્વસ્તિકાઙ્કુશચામરાન્ ॥ ૪૩॥

દદ્યાત્ સત્પુરુષાયાઽપિ મિષ્ટાન્નામ્બરકાણિ ચ ।
ઘૃતપાત્રાણિ પાત્રાણિ સહિરણ્યકાનિ સન્દિશેત્ ॥ ૪૪॥

શર્કરાસક્તુપાત્રાણિ ચતુર્માસં દિશેત્તથા ।
તિલપાત્રાણિ પૂર્ણાનિ રસપાત્રાણિ યાનિ ચ ॥ ૪૫॥

ગન્ધોદકં પુષ્પવારિ ચન્દનં કુઙ્કુમોદકમ્ ।
અપક્વં દધિ દુગ્ધં ચ ગોશૃઙ્ગોદકમિત્યપિ ॥ ૪૬॥

તુલસીં કમલં દદ્યાચ્ચાતુર્માસ્યે સદાર્ચને ।
દાને સર્વં પ્રદદ્યાચ્ચ વદેચ્ચાપિ શ્રિયાઃ પુરઃ ॥ ૪૭॥

લક્ષ્મી મે પ્રીયતાં નિત્યં પાપનાશાય માધવી ।
સૌભાગ્યાય પ્રસન્નાઽસ્તુ લલિતા મે સુખાય ચ ॥ ૪૮॥

એવમુક્ત્વા દિશેત્સર્વં કાર્તિકે દશમીદિને ।
હિરણ્યકમલં દત્વા ચૈકાદશ્યાં પ્રગે પુનઃ ॥ ૪૯॥

પૂજયિત્વા વ્રતં પૂર્ણં કુર્યાદ્દિશેદ્દ્વિજાતયે ।
સતૂલાવરણાં શય્યાં લક્ષ્મીર્મે પ્રીયતામિતિ ॥ ૫૦॥

આર્દ્રાનનરમાનારાયણવ્રતં ત્વિદં મહત્ ।
તેનેહાઽમુત્ર ચ સદાનન્દમાપ્નોતિ સમ્પદઃ ॥ ૫૧॥

ભુક્ત્વા સ્વર્ગાન્ ચિરસ્થાઁશ્ચ પરં પદમવાપ્નુયાત્ ।
શ્રોતુર્વક્તુશ્ચ સંસ્મર્તુશ્ચાપ્યાનન્દો ભવેદ્ધ્રુવઃ ॥ ૫૨॥

ગૃહે સ્વે મહદાનન્દશતાનિ ચાનુભૂય ચ ।
ભૂયો લક્ષ્મીપદં યાતિ શ્રીપુરં ધામ ચૈશ્વરમ્ ॥ ૫૩॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૩૮-અધ્યાયાન્તર્ગતં આર્દ્રાનન્દલક્ષ્મીવ્રતનિરૂપણં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૩૮/૨૨-૫૩॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 138/22-53..

Proofread by PSA Easwaran

*Ardranandalakshmivratanirupanam*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*